## अध्याय : ७ chapter-7

अर्जुन उवाच ।।
महीसागरमाहात्म्यमद्भुतं कीर्तितं त्वया ।।
विस्मयः परमो मह्यं प्रहर्षश्चोपजायते ।। १

तदहं विस्तराच्छ्रोतुमिदमिदच्छामि नारद ।।
कस्य यज्ञे महीगुलाना वह्निनतापाभिता पिता ।। २

नारद उवाच ।।[१]
महदाख्यानमाख्यास्ये यथा जाता मही नदी ।।
श्रृण्वन्नेतां कथां पुण्यां पुण्यमाप्स्यसि पांडव ।। ३

पुराभूद्भूपति भूमाविन्द्रद्युम्न इति श्रुतः[२] ।।
वदान्यः सर्व धर्मज्ञो मान्यो मानयिता प्रभुः ।। ४

उचितज्ञो विवेकस्य निवासो गुणसागरः ।।
न यदस्ति[३] धरापृष्ठे नगरं ग्रामपत्तनम् ।। ५

तदीयपूर्त धर्मस्य चिह्नेन न यदंकितम् ।।
कन्यादानानि बहुधा ब्राह्मेण विधिना व्यधात् ।। ६

भूपालो सौ यदो दानमासहस्त्राद्धनार्थिनाम् ।।
दशमी दिवसे शत्रौ गजपृष्ठेन दुन्दुभिः[४] ।। ७

---

१ ब श्री नारद उ० ।।
२ अ स्मृतः
३ अ, क पदस्ति
४ ब दुंदुभिः

ताडयते तत्पुरे प्रातः कार्यमेकादशीव्रतम् ।।
यज्वना तेन भूपेन [3अ] विच्छिन्नं सोमपायिनाम्[1] ।। ८

स्वर्णैरास्तृता दर्भैर्द्वंगुलोत्सेधिता मही ।।
गंगायां सिक्ता धारा वर्षतो दिवि तारकाः[2] ।। ९

शक्या गणयितुं प्राज्ञैस्तदीयं सुकृतं न तु ।।
ईदृशैः[3] सुकृतैरेषा तेनैव वपुषा नृपः ।। १०

धाम प्रजापतेः प्राप्तो विमानेन कुरूद्वह ।।
बुभुजे स तदाभोगान्दुर्लभानमरैरपि ।। ११

अथ कल्पशतस्यांते व्यतीते तं महीपतिम् ।।
प्राह प्रजापतिः सेवावसरायातमात्मनः[4] ।। १२

ब्रह्मोवाच[5] ।।
इन्द्रद्युम्न द्रुतं गच्छ धरापृष्ठं नृपोत्तम ।।
न स्यातव्यं मदीयेऽद्य लोके क्षणमपि त्वया ।। १३

इद्रद्युम्न उवाच ।।
कस्माद्बहूनन्निततो भूमौ मां प्रेषयसि सम्प्रति ।।
सति पुण्ये मदीये तु बहुले वद कारणम् ।। १४

---

१ अ पीवना ब पाथिना
२ ब तारका
३ ब ईदतैः
४ अ, ब ना
५ ब ब्रह्मा उ० ।।

ब्रह्मोवाच ।।
नपुण्यं केवलं राजन्गुप्तं स्वर्गस्य साधकम् ।।
विना निष्कलुमषां कीर्तिं त्रिलोकीतल विस्तृताम् ।। १५

तव कीर्तिसमुच्छेदः सांप्रतं वसुधातले ।।
संजातश्चिर कालेन गत्वा तां कुरु नूतनाम् ।। १६

यदिवांछा महीपाल मम धामनि संस्थितौ ।। १७

इन्द्रद्युम्न उवाच ।।
मदीयं सुकृतं ब्रह्मन्कथं भूमौ भवेदिति ।।
किं कर्तव्यं मयातन्मम चेतसितिष्ठति ।। १८

ब्रह्मोवाच ।।[१]
बलवानेष भूपाल कालः कलयति स्वयम् ।। १९

ब्रह्मांडान्यपि मां चैव गणनाका भवादशाम् ।।
तदेतदेव मन्येऽहं तव भूपाल सांप्रतम् ।। २०

यत्कीर्तिमात्मनो व्यक्तिम् नीत्वाभूयं हि पुनर्दिवम् ।।
शुश्रुवानिति वाचं स ब्रह्मणः[२] पृथिवीपतिः ।। २१

---

१ ब श्री ब्रह्मा उ० ।।
२ अ। क्र ब्रह्मणः

पश्यतिस्म तथात्मानं महीतलमुपागतम् ।।
कांपिल्यनगरे[1] भूयः पप्रच्छात्मानमात्मना[2] ।। २२

नगरं स तदादेशमप्राक्षीदिति विस्मितः ।।
जनाऊचुः ।।
न जानीमो वयं भूयमिंद्रद्युम्नं न तत्पुरम् ।। २३

यत्त्वं पृच्छसि भो भद्र कञ्चित्पृच्छचिरायुषाम् ।।
इन्द्रद्युम्न् उवाच ।।
कः संप्रति धरापृष्ठे चिरायुः प्रथितो जनाः ।। २४

पृथिवीजयराज्यैस्मिन्यत्र प्रब्रूत मा चिरम् ।।
जना ऊचुः ।।[3]
श्रूयते नैमिषारण्ये सप्तकल्पस्मरो[4] मुनिः २५

मार्कंडेय इति ख्यातस्तं गत्वा पृच्छ संशयम् ।।
तथोपदिष्टस्तैर्गत्वा तत्र तं मुनिपुंगवम् ।। २६

निशम्य प्रणिपत्याह नृपः[5] स्वत्न्दद्दय स्थितम् ।।
इंद्रद्युम्न उवाच ।।
चिरायुर्भगवान्भूमौ विश्रुतः सांप्रतं ततः ।। २७

पृच्छाम्यहं भवान्वेत्ति इंद्रद्युम्न नृपं न वा ।। २८

---

१ अ कौंपिल्य
२ ब पपृच्छा
३ ब जनाजुचुः
४ ब स्मतौ
५ ब नृप

श्री मार्कंडेय उवाच ॥

सप्तकल्पान्तरे नाभूत्कोपींद्रद्युम्न संश्रितः ॥
भूपाल किमहंवच्मि तवान्यत्पृच्छ संशयम् ॥ २९

स निराशस्तदाकर्ण्य वचो भूपोऽग्निसाधने ॥
समुद्योगं तदा चक्रे तं दृष्ट्वाह तदा[१] मुनिः ॥ ३०

श्री मार्कंडेय उवाच ॥
मा साहसमिदं कार्षीर्भद्र वाचं श्रृणुष्व मे ॥
एति जीवंतमानंदो नरं वर्ष शतादपि ॥ ३१

तत्करोमि प्रतीकारं तव दुःखोपशांतये ॥
श्रृणु भद्र ममास्तीह बको मित्रं चिरंतनः[२] ॥ ३२

नाडीजंघ इति ख्यातः स त्वा ज्ञास्यत्यसंशयम् ॥
तस्मादेहि द्रुतं यावदावां तत्र व्रजावहे ॥ ३३

परोपकारैकफलं जीवितं हि महात्मनाम् ॥
यदि ज्ञास्यत्यसंदिग्धमिंद्रद्युम्नं स वक्ष्यति[३] ॥ ३४

तौ प्रस्थिताविति तदा विप्रेन्द्रनृप पुंगवौ ॥
हिमाचलं प्रति प्रीतौ नाडीजंघालयं प्रति ॥ ३५

---

१ अ. ब "पुनः"

२ अ चिरंतनम्

३ अ According to the MSS 'A' the chapter is finished with the words - इति स्कंदपुराणे कुमारिकाखंडे मार्कंडेयाभिगमनं ॥

New chapter begins with the words - नारद उवाच ॥

Further slokas ~~run~~ in the printing work are same as ~~the~~ in the MSS 'A'.

बकोऽथ मित्रं वीक्ष्य चिरकालादुपागतम् ।।
मार्कंडेय ययौ प्रीत्युत्कंठितः सम्मुखं द्विजैः[१] ।। ३६

कृतसंविदभूत्पूर्वं कुशलस्वागतादिना ।।
पप्रच्छानंतरं कार्यं वदागमनकारणम् ।। ३७

मार्कंडेयोपि तं प्राह बकं प्रस्तुतमीप्सितम् ।।
इंद्रद्युम्नं भवान्वेत्ति भूपालं पृथिवी तले ।। ३८

एतस्य मम मित्रस्य तेन ज्ञातेन कारणम् ।।
[२]नो वायं त्यजति प्राणान्पुरा वह्निप्रवेशनात् ।। ३९

ऽ एतस्य प्राणरक्षार्थं ब्रूहिजानासि चेन्नृपम् ।। ४०

नाडीजंघ उवाच ।।[३]
चतुर्दश स्मराम्यस्मि कल्पान्विप्रेंद्र सांप्रतम् ।।
आस्तां तद्दर्शनं वार्तामपि वा न स्मराम्यहम् ।। ४१

इंद्रद्युम्नो महीपालः कोऽपि नासीन्महीतले ।।
एतावन्मात्रमेवाहं जानामि द्विजपुंगव ।। ४२

---

१ अ, ब द्विजः
२ ना यं त्यजति ब पाठः ।
३ ब प्रतौ "नाडीजंघ" ।। मुद्रित पुस्तके उवाच अधिकः पाठः ।।

नारद उवाच ।।[1]

ततः स विस्मयाविष्टस्तस्यायुरिति शुश्रुवान् ।।
प्रप्रच्छ राजा को हेतुर्दानस्य तपसोऽथवा ।।
यदा युरीदर्शं दीर्घं संजातमिति विस्मितः ।। ४३

नाडीजंघ उवाच ।।

घृतकंबलमाहात्मयान्मम देवस्य शूलिनः ।।
दीर्घमायुरिदं विप्र शापाद्बकवपुः शृणु ।। ४४

पुरा[2] जन्मन्यहं बालो ब्राह्मणस्याभवं[3] भुवि ।।
पाराशर्यसगोत्रस्य विश्वरूपस्य सन्मुनेः ।। ४५

बालको[4] बक इत्यवं प्रतीतोऽतिप्रियः पितुः ।।
चपलोऽतीव बालत्वे निसर्गादिव भद्रक ।। ४६

अथ मारकतं लिंगं देवतावसरात्पितुः ।।
चापलयाद्बाल भावाच्चापहृत्य निहितं मया ।। ४७

घृतस्य कुंभे संक्रांतो मकरस्यौत्तरायणे ।।
अथ प्रातर्व्यतीतायां निशि[5] यावत्पिता ममः ।। ४८

निर्माल्यापनयं चक्रे तावच्छून्यं शिवालयम् ।।
निरीक्ष्य कांदिशीको मां पप्रच्छ मधुरस्वरम् ।। ४९

---

१ ब श्री नारद उ० ।।

२ ब राजा

३ अ भव

४ अ वृद्धत्वं अत आरंभ्यैते ।

५ अ निशा ब ब निशी

वत्स क्व नु त्वया लिंगं नूनं विनिहितं वद ||
दास्यामि वांछितं यत्ते भक्ष्यमन्यत्तवेप्सितम् || ५०

ततो मया बालभावाद्भक्ष्यलुब्धेन तत्पितुः ||
घृत कुंभांतराऽकृष्य भद्रलिंगं समर्पितम् || ५१

अथ काले तु संप्राप्ते प्रमीतोऽहं नृपालये ||
जातो जातिस्मरस्तावदानर्ताधिपतेः सुतः || ५२

घृतऽकंबल माहात्म्यान्मकरस्थे दिवाकरे ||
अपि बाल्यादवज्ञानात्संयोगाद्घृत लिंगयोः || ५३

ततः संस्थापितं लिंगं प्राग्जन्म स्मरता मया ||
ततः प्रभृति लिंगानि घृतेनाच्छादयाम्यहम् || ५४

पितृपैतामहं प्राप्य राज्यं शक्त्यनुरूपतः ||
ततः प्रसन्नो[1] भगवान्पार्वतीपतिराह माम् || ५५

पूर्वजन्मनि तुष्टोऽहं घृतकंबलऽपूजया ||
प्रयच्छाम्यस्मि त राज्यमधुनाभिमतं वृणु || ५६

---

१ ब प्रसंना

ततो मया वृतः प्रादादृगाणपत्यं मदीप्सितम् ।।
कैलासे[1] मां शिवो नित्यं संतुष्टः प्राहचेतिच ।। ५७

तेनैव हि शरीरेण प्रणतं पुरतः स्थितम् ।।
अद्यप्रभृति संक्रांतौ मकरस्यापरोपि यः ।। ५८

धृतेन पूजां कर्तासौ भावी मम गणः स्फुटम् ।।
इत्युक्त्वा मां शिवो भद्र गणकोटीश्वरं व्यधात् ।। ५९

प्रतीपपालकंनाम[2] संस्थितं शिवशासनम्[3] ।।
ततः कामादिभिः षाड्भिः पदैश्चंक्रमणात्मिकाम् ।। ६०

निसर्गचपलां प्राप्य भ्रमरीमिव तांश्रियम् ।।
नैवालमभवं तस्या धारणे दैवयोगतः ।। ६१

विचचार तदामत्तः किलाहंवारणो यथा ।।
कृत्याकृत्य विचारेण विमुक्तोऽतीव गर्वितः ।। ६२

अथ काले व्यतिक्रांते कियन्मात्रे यदृच्छया ।।
विचरन्नगमं शैलं हिमानीरुद्ध कंदरम् ।। ६३

---

१ अ कैलाशे

२ ब प्रतीपंगालकंनाम

३ ह अ शासने

विद्यामभिजनं लक्ष्मीं प्राप्य नीचनरो[1] यथा ।।
आपदां पात्रतामेति सिंधूनामिव सागरः ।। ६४

तपस्यति मुनिस्तत्र गालवो भार्यया सह ।।
सदैव तीव्रतपसा कृशो धमनि संततः [2] ।। ६५

ब्राह्मणस्य हि देहायं नैवैहिकफल प्रियः ।।
कृच्छ्राय तपसे चेह प्रेत्यानंत सुखाय च ।। ६६

तस्य भार्याऽतिरूपेण विजिगृये विश्ववर्णिनी ।।
तन्वी श्यामा मृगाक्षी/सा पीनोन्नतपयो धरा ।। ६७

हंसगद्गद संभाषा मत्तमातंग गामिनी[3] ।।
विस्तीर्णजघना मध्ये क्षामा दीर्घ शिरोरुहा ।। ६८

निमून्नाभिर्विधात्रैषा निर्मिता संदिद [4]क्षुणा ।।
विकीर्णमिव सौंदर्यमेक पात्रमिव स्थितम् ।। ६९

ततोऽविनीतस्तां वीक्ष्य भद्र गालववल्लभाम् ।।
अहमासं शरव्रातैस्ताडितः पुष्पधन्विना ।।
विवेकिनोऽपि मुनयस्तावदेव विवेकिनः ।। ७०

---

१ अ नीचजनो

२ अ संगतः

३ ब गामिनि

४ ब दक्षिणा

यावन्न हरिणाक्षीणामु पांगविवरेक्षिताः[1] ।।
मया व्यवसितं चित्ते तदानीं तां जिहीर्षुणा ।। ७१

इति चेति हरिष्यामि तपसा रक्षितां मुनेः ।।
अस्याः[2] कृते यदि शपेन्मुनिस्तत्र पराभवः ।। ७२

मम भावी भवेदेषा भार्या मृत्युरुतापिमे ।।
तस्माच्छिष्यो भवाम्यस्य शुश्रूषानिरतो मुनेः[3] ।। ७३

प्राप्यांतरं हरिष्यामि नास्य योगृयेयमंगना ।।
इति व्यवस्य विद्यार्थिमूर्तिमास्थाय गालवम् ।। ७४

नमस्कृत्य वचोऽवोचमिति भाव्यर्थनोदितः ।।
तथा मतिस्तथा मित्रं व्यवसायस्तथा नृणाम् ।। ७५

भवेदवश्यं तद्भावि यथा पुंभिः पुराकृतम् ।।
विवेक वैराग्ययुतो भगवंस्त्वामुप स्थितः ।। ७६

शिष्योऽहं भवता पाठ्यं कर्णधारं महामुनिम् ।।
अपारपारदं[4] विष्णुं विप्रमूर्ति मुपाश्रितम् ।। ७७

---

१ आ। ब रंगाविवेक्षिताः
२ अ। अस्याम्
३ ब मुनः
४ अ अपारदपरं

नमस्ये च ेतनं ब्रह्म प्रत्यक्षं मालवाख्यया ।।
अविद्या कृष्ण सर्पेण दष्टं तद्विषापीडितम् ।। ७८

उपदेशमहामंत्रैर्मा जांगुलिक जीवय ।।
महामोहमहा[1] वृक्षात्त्वधा वापसमुत्थितः ।। ७९

त्वद्वाक्य तीक्ष्णधारेण कुठारेण क्षयं व्रजेत् ।।
अपवर्गपथव्यापी मूढसंसर्ग से चनः[2] ।। ८०

छिन्नतां सूत्रधारेण विद्यापरशुनाधुना ।।
भजामि तव शिष्योऽहं वरिवस्यापर श्विवरम् ।। ८१

समिद्भर्मून्मूल फलं दारुणि जलमेव च ।।
आहरिष्ये नुगृहीष्व विनीतं मामुपस्थितम् ।। ८२

इर्ष्यां पुरा बकाभिख्यं बकवृत्तिमुपाश्रितम् ।।
तदाऽऽजवि कृतमतिरनुज ग्राहमां मुनिः ।। ८३

ततोऽपीव विनीतोऽहं भूत्वा तं ब्राह्मणीयुतम् ।।
विश्र्वासनाय सुदृढं तोषयामि दिने दिने ।। ८४

---

१ अ महामोक्ष

२ ब चेतनः

स च जान्नुमुनिः पत्नीं पात्रभूताम विश्रवसीन्[1] ।।
स्त्री चरित्र विदके. तां विद्याय स्वपिति द्विजः ।। ८५

अथान्यस्मिन्दिने साभूद्बुद्ध्वा्मण्यथ रजस्वला।।
तद्दूरशायिनी रात्री विश्रवाश्रान्मे तपस्विनी ।। ८६

इदमन्तरमित्थंतर्विचिंत्याहं प्रहर्षितः ।।
मलिम्लुचाकृति भूत्वा निशीथे तामथाहरम् ।। ८७

विललाप तदा[2] बाला ह्रियमाणा मयोच्चकैः ।।
मैवं मैव-मिति ज्ञात्वामां स्वरेणाब्रवीन्मुनिम् ।। ८८

बकवृत्तिरयं दुष्टो धर्म-कंचुकमाश्रितः ।।
हरैते मां दुराचारस्तस्मात्त्वं त्राहि गालव ।। ८९

तव शिष्यः पुरा भूत्वा कौप्येष्याद्यमलिम्लुचः ।।
मां जिहीर्षति तद्क्षा शरण्य शरणं भव ।। ९०

तद्वाक्य समकालं स प्रबुद्धो गालवो मुनिः ।।
तिष्ठतिष्ठेति मामुकत्वा गतिस्तम्भं व्यधान्मम् ।। ९१

---

१ ब विश्रवसत्

२ अ. ब तथा

ततश्छिन्नाकृतिरहं स्तम्भितो मुनिना ऽभवम् ।।
व्रीडितं प्रविशामीव स्वांगानि किललज्ज्या ।। ९२

ततः प्रकुपितः प्राह मामभ्येत्याथ गालवः ।।
तद्वज्र दुःसहं वाक्यं येनाहम भवं[1] बकः ।। ९३

गालव उवाच ।।
बकवृत्तिमुपाश्रित्य वंचितो ऽहं यतस्त्वया[2] ।।
तस्माद्बकस्त्वं भविता चिरकालं नराधम ।। ९४

इति शप्तो ऽहमभवं मुनिना ऽधर्ममाश्रितः ।।
परदारोपसेवार्थ मनर्थमिमागतः ।। ९५

न हीदृशमनायुष्यं लोके किंचन विद्यते ।।
यादृशं पुरुषस्येह परदारोप सेवनम् ।। ९६

ततः सती सा मत्स्पर्श दूषितांगी तपस्विनी ।।
मया विमुक्ता स्नात्वा मां तथैवानुशशाप ह ।। ९७

एवं ताभ्यामहं सप्तो ह्यश्वत्थपर्ण वद्भयात् ।।
कंपमानः प्रणम्योभाववोचं तत्र दम्पती[3] ।। ९८

---

१ अ भव
२ ब यतस्तया
३ ब दंपति

गणोऽहमीश्वरस्यैव दुर्वनीततरो युवाम् ।।
[1]निरोधमेवं कुरुतं भगवंतावनुग्रहम् ।। ९९

वाचि क्षुरो नावनीतं त्वदयं हि द्विजन्मनाम् ।।
प्रकुप्यति प्रसीदंति क्षणेनापि प्रसादताः ।। १००

त्वयि विप्रति पन्नस्य त्वमेव शरणं मम् ।।
भूमौ स्खलितपादानां भूमिरेवावलंबनम् ।। १०१

गणाधिपत्यमपि मे जातं परिभवास्पदम् ।।
विपदंता हि जायन्ते दुर्विनीतस्य सम्पदः ।। १०२

विदुरेष्य द्वियाऽपायं परतोऽन्ये विविकिनः[2] ।।
नैवोभयं विदुर्नीचा विनाऽनुभवमात्मनः[3] ।। १०३

दुर्विनीतः श्रियं प्राप्य विद्यामैश्वर्य मेव वा ।।
न तिष्ठति चिरं स्थाने यथाऽहंमदगर्वितः ।। १०४

विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ।।
एते मदा मदांधानामेत एव सतां दमाः ।। १०५

---

१ अ. ब विरोधएव

२ ब विवेकितः

३ अ. ब आत्मना

नो दर्क शालिनी बुद्धिर्येषामविजितात्मनाम्[१] ।।
तैः श्रियश्चपला वाच्यं नीयंते मादशैर्जनैः ।। १०६

तत्प्रसीद मुनिश्रेष्ठ शापांतं मे ऽधुनाकुरु ।।
दुर्विनीतेष्वपि सदा क्षमाचारा हि साधवः ।। १०७

इत्थंवचसि विज्ञप्ते विनीतेनापि वै मया ।।
प्रसादप्रवणो[२] भूत्वा शापांतं मे तदा व्यधात् ।। १०८

[३]गालव उवाच ।।
ब छन्नकीर्ति समुद्धार सहायस्त्वं भविष्यसि ।।
यदेन्द्रद्युम्न भूपस्य तदा मोक्षमवाप्स्यसि ।। १०९

इत्यहं मुनिशापेन तदाप्रभृति पर्वते ।।
हिमाचले बकोभूत्वा काश्यपेयो[४] वसामि च ।। ११०

राज्यं चिरायुरिति मे धृतकम्बलस्य
जातिस्मरत्वमधुनापि तयानुभावात् ।।
शापाद्बक त्वमभवन्मुनि गालवस्य
तद्भद्र सर्वमुदितं भवताद्यपृष्ठम् ।। १११

---

५ इति श्री स्कांदे महापुराणे एकाशीत सहस्र्यां संहितायां प्रथमे माहेश्वरखंडे कौमारिकाखण्डे महीप्रादुर्भावे सप्तमो ऽध्यायः ।।

---

१ अ विदिता २ ब प्रणयो
३ अ ब प्रेक्षिष्णु इत्ययं पाठ नास्ति ।
४ अ कास्यपेयो
५ अ इति स्कंदपुराणे महीप्रार्दुभावे बक वाक्यं ।।
ब इतिश्री स्कंदपुराणे कुमारिकाखंडे महिप्रादुभावे सप्तमो ऽध्यायः ।।७।।